शिव उवाच ।
यदतीर्थं मुनिर्यावत् तावत् स ददृशेऽखिलैः ।
सर्व्वावयवसम्पूर्णो गजानन उमासुतः ॥
किरीटकुण्डलधरो युगबाहुः सुलोचनः ।
वामदक्षिणभागे च सिद्धिवृद्धिविराजितः ॥
दृष्ट्वा विनायकं स्कन्द ! तथाभूतं निजेच्छया ।
हर्षोत्फुल्लनयना देवाः सर्व्वे तदाब्रुवन् ॥
गजानन इति ख्यातो भविताऽयं जगत्त्रये ।
एवं भाद्रचतुर्थ्यां स अवतीर्णो गजाननः ॥")
गजारिः, पुं, (गजस्य अरिः शत्रुः । तन्नाशकत्वात् तथात्वम् ।) वृक्षविशेषः । सिंहः । यथा, "गजारिसुरसिंहयोः ।" इति हेमचन्द्रः ॥
गजाशनः, पुं, (गजेन हस्तिना अश्यते अद्यते इति । गज + अश् + कर्म्मणि ल्युट् ।) अश्वत्थवृक्षः । इति रत्नमाला ॥ गजादनोऽपि ॥
गजाशना, स्त्री, (अश्नातीति । अश ग भोजने + कर्त्तरि ल्युः । गजः अशनो भक्षको यस्याः ।) भङ्गा । इति शब्दचन्द्रिका ॥ (यस्त्विमियं व्यवह्रियते तद्यथा,—
"गजाशना-कुम्भिक-दाडिमानां
रसैः कृते तैलघृते सदध्नि ॥"
इति सुश्रुते उत्तरतन्त्रे चत्वारिंशत्तमेऽध्याये ॥)
शल्लकीवृक्षः । पद्ममूलम् । इति रत्नमाला ॥
गजास्यः, पुं, (गजस्य आस्यं मुखमेव आस्यं यस्य ।) गणेशः । इति हेमचन्द्रः ॥ (गजस्य आस्यम् ।) हस्तिमुखे क्ली ॥
गजाह्वं, क्ली, (गजेन गजनाम्ना आहूयते इति गजेन सह आह्वा संज्ञा यस्य इति वा ।) हस्तिनापुरम् । इति मेदिनी ॥
गजाह्वयं, क्ली, (गजेन गजनाम्ना आह्वयोऽस्य ।) हस्तिनापुरम् । इति शब्दरत्नावली ॥
गजाह्वा, स्त्री, (गजस्य आह्वया संज्ञया आह्वा संज्ञा यस्याः ।) गजपिप्पली । इति मेदिनी ॥ (पर्य्यायोऽस्या यथा,—
"करिपिप्पलीभकणा कपिवल्ली कपिवल्लिका ।
श्रेयसी वशिरश्चापि गजाह्वा गजपिप्पली ॥"
इति वैद्यकरत्नमालायाम् ॥)
गजेष्टा, स्त्री, (गजस्य इष्टा प्रिया ।) विदारी । इति राजनिर्घण्टः ॥ भुँइकुमड़ा इति भाषा ॥
गजोषणा, स्त्री, (गजोपपदेन युता उषणा पिप्पली ।) गजपिप्पली । इति राजनिर्घण्टः ॥
गञ्जः, पुं, (गजि भावे + घञ् ।) अवज्ञा । भाण्डागारम् । खनिः । इति हेमचन्द्रः ॥ गोष्ठागारम् । इति हारावली ॥ गोयालिघर इति भाषा ॥
गञ्जः, पुं क्ली, (गजि भावे + घञ् ।) भाण्डागारम् । इति मेदिनी ॥
गञ्जा, स्त्री, (गञ्ज + टाप् ।) मदिरागृहम् । इत्यमरः ।२।२।८॥ खनिः । इति मेदिनी ॥ पामरसद्म । मद्यभाजनम् । इति शब्दरत्नावली ॥
गञ्जिका, स्त्री, (गञ्जा + स्वार्थे कन् अत इत्वम् ।) मदिरागृहम् । इति शब्दरत्नावली ॥

गड, ह गण्डे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट्-इदित् ।) ह, कर्म्मणि गण्ड्यते । गण्डे कपोलविषयक्रियायाम् । तथा च । यत्र द्रव्यनिर्द्देशस्तत्र तन्निष्ठक्रियाविशेषो लक्ष्यते । इति मैत्रेयबोपदेवौ ॥ रमानाथस्तु कटु कार्कश्य इत्यस्मात् कार्कश्य इत्यनुवृत्त्या कपोलकर्तृककार्कश्यमिति व्याख्याय गण्डति कपोलः पांशुना इत्युदाहृतवान् । केचित्तु गण्ड इति शब्दस्य व्युत्पत्त्यर्थमेवायं धातुर्मन्यन्ते न त्वस्यान्यत्र प्रयोग इत्याह । इति दुर्गादासः ॥
गड, म सेके । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । घटादिः ।) म, गड़यति । सेकः क्षरणम् । गड़यति घटात् पानीयम् । डलयोरेकत्वात् लस्यैव प्राय: प्रयोगः । इति रमानाथः ॥ तन्मते तु लान्तपक्षेऽपि मानुबन्धः । स्वमते तु लान्तो वक्ष्यमाणः स त्वनुबन्धशून्यः इति विरोधः । इति दुर्गादासः ॥
गड़ः, पुं, (गड़ति गलति इष्टाज्जालादिभ्यो वा क्षरतीत्यर्थः । गड् + अच् ।) मत्स्यभेदः । गडुइ माछ इति भाषा ॥ अन्तरायः । इति मेदिनी ॥ परिखा । व्यवधानम् । इति शब्दरत्नावली ॥ देशविशेषः । राजनिर्घण्टे गड़लवणपर्य्याये गड़देशजमिति दर्शनात् ॥
गड़कः, पुं, (गड़ + स्वार्थे कन् ।) मत्स्यविशेषः । गडुइ माछ इति भाषा । तत्पर्य्यायः । शकुलार्भकः २ । इत्यमरः । १ । १० । १७ ॥ गड़ः ३ गलः ४ गलकः ५ । इति शब्दरत्नावली ॥ अस्य गुणाः । मधुरत्वम् । रूक्षत्वम् । कषायत्वम् । शीतलत्वम् । लघुत्वञ्च । इति राजवल्लभः ॥
गड़यन्तः, पुं, (गड़यति जलमिति । गड़ क्षरणे + णिच् । "तभूवह्विवसिभासिसाधिगड़ीति ।" उणां ।३।१२८। इति झच् । घटादित्वात् मित्त्वे मितां ह्रस्वः अयामन्तेति णेरयादेशः ।) मेघः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
गड़लवणं, क्ली, (गड़देशाज्जातं लवणम् । शाकपार्थिवादिवत् मध्यपदलोपिसमासः ।) सांवरदेशोद्भवलवणम् । साम्‌रलुण इति भाषा ॥ तत्पर्य्यायः । शुभ्रम् २ पृथ्वीजम् ३ गड़देशजम् ४ गड़ोत्थम् ५ महारम्भम् ६ सांवरम् ७ संवरोद्भवम् ८ । अस्य गुणाः । उष्णत्वम् । लवणत्वम् । ईषत्तिक्तत्वम् । मलापहत्वम् । दीपनत्वम् । कफवातार्शोनाशित्वम् । कोष्ठशोधनत्वञ्च । इति राजनिर्घण्टः ॥
गड़देशजं, क्ली, (गड़देशात् जायते इति । जन् + डः ।) सांवरलवणम् । इति राजनिर्घण्टः ॥
गड़िः, पुं, (गड़ + इन् ।) वत्सतरः । इति राजनिर्घण्टः ॥ अलसो गवादिः । गड़िया इति भाषा ॥ यथा, काव्यप्रकाशे ।
"गुणानामेव दौरात्म्याद्धुरि धुर्य्यो नियुज्यते ।
असंजातकिणस्कन्धः सुखं स्वपिति गौर्गड़िः ॥"
गडुः, पुं, (गड़ + बाहुलकात् उन् ।) गलगण्डः । पृष्ठगुड़ः । स तु घाटामस्तकयोर्मध्ये मांसवृद्धिः । इति लिङ्गादिसंग्रहे अमरभरतौ ॥ कुब्जः । इति मेदिनी ॥ शल्यास्त्रम् । इति शब्दरत्नावली ॥ किञ्चलुकः । इति त्रिकाण्डशेषः ॥ विषमग्रन्थिः । यथा काव्यप्रकाशे तदेतत् काव्यान्तर्गडुभूतमिति नास्य भेदलक्षणं कृतमित्यत्र तट्टीकाकारः ॥ ("न च अजागलस्तनवदनर्गडुना तेन किं वेति वाच्यम् ।" इति वेदान्तभाष्यम् ॥)
गडुरः, त्रि, (गडुल + रस्य लत्वम् ।) कुब्जः । इति शब्दरत्नावली ॥
गडुलः, त्रि, (गडुः स्थूलमांसपिण्डविशेषः अस्यास्तीति । गडु + "सिध्मादिभ्यश्चेति ।" ५ । २ । ९७ । इति लच् ।) कुब्जः । इत्यमरः ।२।६।४८॥
गड़ेरः, पुं, (गड़ + "पतिकठिकुठिगडिगुडिदंशिभ्य एरक् ।"उणां ।१। ५९ । इति एरक् ।) मेघः । इति त्रिकाण्डशेषः ॥
गड़ोत्थं क्ली, (गड़देशात् उत्तिष्ठति संजायते इति । गड़ + उत् + स्था + कः ।) गड़लवणम् । इति राजनिर्घण्टः ॥
गड़ोलः, पुं, (गड़ + "कपिगडिगण्डिकटिपटिभ्य ओलच् ।" उणां । १ । ६७ । इति ओलच् ।) गुड़ः । इत्युणादिकोषः ॥ ग्रासः । इति हेमचन्द्रः ॥
गड्डरिका, स्त्री, (गड्डरः जलप्रवाहः सोऽस्यामस्तीति । यद्वा गड्डरः मेषपालः तमनुगच्छतीति । ठन् टाप् च ।) अज्ञातप्रवाहागमभूलो धारावाही नदीविशेषः । इति केचित् । मेषयूथैरनुगम्यमाना मेषी । इत्यन्ये । इति काव्यप्रकाशटीकायां महेश्वरः ॥
गड्डुकः, पुं, (गड्डुक इति निपातनात् द्वित्वम् ।) जलपात्रविशेषः । इति शब्दरत्नावली ॥ गाड़ इति भाषा ॥
गड्डूकः,पुं, (गड्डुक इति पृषोदरात् उकारस्य दीर्घत्वम् ।) गड्डुकः । इति शब्दरत्नावली ॥
गण, त क संख्याने । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) स्तर्द्धन्त्योपधः । गणयति । इति दुर्गादासः ॥
गणः, पुं, (गण्यते गणयति वा कर्म्मण्यप् । कर्त्तरि अच् वा ।) समूहः । (यथा, हितोपदेशे १ । ६३ । [फलम् ॥")
"न गणस्याग्रतो गच्छेत् सिद्धे कार्य्ये समं
प्रमथः । (यथा, मेघदूते । ३५ ।
"भर्त्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः ॥")
रुद्रानुचरः । (यथा, गो: रामायणे । ५।८६।७ ।
"धनाध्यक्षसभां देवः प्राप्तो हि वृषभध्वजः ।
उमासहायो देवेशो गणैश्च बहुभिर्वृतः ॥")
सेनासंख्याविशेषः । तद्यथा । गजाः २७ रथाः २७ अश्वाः ८१ पदातिकाः १३५ समुदायेन २७० । इत्यमरः । २ । ८ । ८१ ॥
(यथा, महाभारते ।
"त्रयो गुल्मा गणो नाम वाहिनी तु गणास्त्रयः ॥")